
कविकुलगुरु - कालिदास - संस्कृत - विश्वविद्यालयः

शु

॥ श्रीगणेशाय नमः ॥ अकारांतः पुल्लिंगो रामशब्दः ॥ रामः रामौ रामाः
१ रामं रामौ रामान् २ रामेण रामाभ्यां रामैः ३ रामाय रामा-
भ्यां रामेभ्यः ४ रामात् रामाभ्यां रामेभ्यः ५ रामस्य रामयोः रा
माणां ६ रामे रामयोः रामेषु ७ हे राम हे रामौ हे रामाः ८ इका
रांतः पुल्लिंगो हरिशब्दः हरिः हरी हरयः १ हरिं हरी हरीन्
२ हरिणा हरिभ्यां हरिभिः ३ हरये हरिभ्यां हरिभ्यः ४
हरेः हरिभ्यां हरिभ्यः ५ हरेः हर्योः हरीणां ६ हरौ हर्यो
ः हरिषु ७ हे हरे हे हरी हे हरयः ८ २ इनंतः पुल्लिंगः करि
न्शब्दः करी करिणौ करिणः १ करिणं करिणौ करिणः २
करिणा करिभ्यां करिभिः ३ करिणे करिभ्यां करिभ्यः ४ क
रिणः करिभ्यां करिभ्यः ५ करिणः करिणोः करिणां ६ करि

॥ शिव ॥ १ ॥

Acc. No. ~~1980~~ M1412 (संपूर्ण)

folio - 28
Xerox - 53

Title - शब्दरूपावलि, तर्कसंग्रह, चतुःश्लोकीभागवत, चतुःश्लोकीभार, शान्तिपाठ, पञ्चकप्रकरण, श्वेतकेतुसंवाद, तारकब्रह्मस्तोत्र.

Author - ? , Date - ? , Subject - Miscellaneous. विभिन्न.

1

णि॥ करिणोः॥ करीषु ७॥ हे करिन् हे करिणौ॥ हे करिणः॥ १८ त
कारांतः पुंल्लिंगो महन्त्‌शब्दः॥ महन्त् महन्तौ॥ महन्तः॥ १॥
महन्तं॥ महन्तौ॥ महन्तः॥ २॥ महन्ता॥ महन्द्भ्यां॥ महन्द्भिः॥
३॥ महन्ते महन्द्भ्यां॥ महन्द्भ्यः॥ ४॥ महन्तः॥ महन्द्भ्यां॥ मह
न्द्भ्यः॥ ५ महन्तः॥ महन्तोः॥ महन्तां ६॥ महन्ति॥ महन्तो
ः॥ महन्त्सु ७ हे महन्त् हे महन्तौ हे महन्तः॥ १८॥ उका

विष्णुः

रांतः पुंल्लिंगो विष्णुशब्दः॥ विष्णुः॥ विष्णू॥ विष्णवः॥ १॥ विष्णुं॥ विष्णू
विष्णून् २ विष्णुना॥ विष्णुभ्यां॥ विष्णुभिः॥ ३॥ विष्णवे॥ विष्णु
भ्यां॥ विष्णुभ्यः॥ ४॥ विष्णोः॥ विष्णुभ्यां॥ विष्णुभ्यः॥ ५॥ विष्णोः
विष्ण्वोः॥ विष्णूनां ६ विष्णौ॥ विष्ण्वोः॥ विष्णुषु ७ हे वि
ष्णो॥ हे विष्णू हे विष्णवः॥ १९॥ ऋकारांतः पुंल्लिंगः कर्तृशब्दः॥

कर्त्ता कर्त्तारौ कर्त्तारः ॥१॥ कर्त्तारं कर्त्तारौ कर्तॄन् ॥२॥ कर्त्रा कर्तृ
भ्यां कर्तृभिः ॥३॥ कर्त्रे कर्तृभ्यां कर्तृभ्यः ॥४॥ कर्त्तुः कर्तृभ्यां कर्तृभ्य
ः ॥५॥ कर्त्तुः कर्त्रोः कर्तॄणां ॥६॥ कर्त्तरि कर्त्रोः कर्तृषु ॥७॥ हे कर्तः हे
कर्त्तारौ हे कर्त्तारः ॥१॥ सकारान्तः पुंल्लिंगश्चंद्रमस् शब्दः ॥ चंद्रमाः
चंद्रमसौ चंद्रमसः ॥१॥ चंद्रमसं चंद्रमसौ चंद्रमसः ॥२॥ चंद्रमसा
चंद्रमोभ्यां चंद्रमोभिः ॥३॥ चंद्रमसे चंद्रमोभ्यां चंद्रमोभ्यः ॥४॥
चंद्रमसः चंद्रमोभ्यां चंद्रमोभ्यः ॥५॥ चंद्रमसः चंद्रमसोः चंद्रम
सां ॥६॥ चंद्रमसि चंद्रमसोः चंद्रमस्सु ॥७॥ हे चंद्रमः हे चंद्रमसौ
हे चंद्रमसः ॥१॥ सकारांतः पुंल्लिंगः तस्थिवस् शब्दः ॥ तस्थिवा
न् तस्थिवांसौ तस्थिवांसः ॥१॥ तस्थिवांसं तस्थिवांसौ तस्थु
षः ॥२॥ तस्थुषा तस्थिवद्भ्यां तस्थिवद्भिः ॥३॥ तस्थुषे तस्थिव

॥ पिवः ॥
॥२॥

भ्यां तस्थिवद्भ्यः ४ तस्थुषः तस्थिवद्भ्यां तस्थिवद्भ्यः ५ तस्थुषः
तस्थुषोः तस्थुषां ६ तस्थुषि तस्थुषोः तस्थिवत्सु ७ हे तस्थिव
न् हे तस्थिवांसौ हे तस्थिवांसः १८ नकारांतः पुल्लिंगो भगवत्
शब्दः भगवान् भगवंतौ भगवंतः १ भगवंतं भगवंतौ भगव
तः २ भगवता भगवद्भ्यां भगवद्भिः ३ भगवते भगवद्भ्यां भग
वद्भ्यः ४ भगवतः भगवद्भ्यां भगवद्भ्यः ५ भगवतः भगवतोः भ
गवतां ६ भगवति भगवतोः भगवत्सु ७ हे भगवन् हे भगवंतौ
हे भगवंतः १९ नकारांतः पुल्लिंगः आत्मन् शब्दः आत्मा आ
त्मानौ आत्मानः १ आत्मानं आत्मानौ आत्मनः २ आत्म
ना आत्मभ्यां आत्मभिः ३ आत्मने आत्मभ्यां आत्मभ्यः ४
आत्मनः आत्मभ्यां आत्मभ्यः ५ आत्मनः आत्मनोः आत्मनां

६ आत्मनि आत्मना: आत्मसु ॥ ७ हे आत्मन् हे आत्मानौ हे आ
त्मान: ॥ १ ॥ १० सामोहरि: करी अन्न छिद्मु: कुलीव चंद्रमा: ॥ लास्थिवा
भगवाना त्माद्यौ तेपुंसि नायका: ॥ १ इतिपुल्लिंगा: ॥ आकारांतस्त्री
लिंगोरमाशब्द: रमा रमे रमा: ॥ १ रमां रमे रमा: २ रमया रमाभ्यां
रमाभि: ३ रमायै रमाभ्यां रमाभ्य: ४ रमाया: रमाभ्यां रमाभ्य:
५ रमाया: रमयो: रमाणां ६ रमायां रमयो: रमासु ७ हे रमे हे र
मे हे रमा: ॥ १ ॥ १ इकारांतस्त्रीलिंगोमतिशब्द: ॥ मति: मती मतय
: ॥ १ मतिं मती मती: ॥ २ मत्या मतिभ्यां मतिभि: ३ मत्यै मत
ये मतिभ्यां मतिभ्य: ४ मत्या: मते: मतिभ्यां मतिभ्य: ५ मत्या:
मते: मत्यो: मतीनां ६ मत्यां मतौ मत्यो: मतिषु ७ हे मते हे
मती हे मतय: ॥ १ ॥ २ ईकारांतस्त्रीलिंगोनदीशब्द: ॥ नदी नद्यौ न

॥ शिव: ॥
॥ ३ ॥

यः १ नदीं नद्यौ नदीः २ नद्या नदीभ्यां नदीभिः ३ नद्यै नदीभ्यां
नदीभ्यः ४ नद्याः नदीभ्यां नदीभ्यः ५ नद्याः नद्योः नदीनां ६
नद्यां नद्योः नदीषु ७ हे नदि हे नद्यौ हे नद्यः ८ ३ उकारांत स्त्री
लिंगो धेनुशब्दः धेनुः धेनू धेनवः १ धेनुं धेनू धेनूः २ धेन्वा
धेनुभ्यां धेनुभिः ३ धेन्वै धेनवे धेनुभ्यां धेनुभ्यः ४ धेन्वाः धेनो
ः धेनुभ्यां धेनुभ्यः ५ धेन्वाः धेनोः धेन्वोः धेनूनां ६ धेन्वां धेनौ
धेन्वोः धेनुषु ७ हे धेनो हे धेनू हे धेनवः ८ ४ चकारांत स्त्रीलिंगो
वाक्शब्दः वाक् वाचौ वाचः १ वाचं वाचौ वाचः २ वाचा वा
ग्भ्यां वाग्भिः ३ वाचे वाग्भ्यां वाग्भ्यः ४ वाचः वाग्भ्यां वाग्भ्यः
५ वाचः वाचोः वाचां ६ वाचि वाचोः वाक्षु ७ हे वाक् हे वाचौ
हे वाचः ८ ५ इकारांत स्त्रीलिंगो धीशब्दः धीः धियौ धियः १ धियं

धियौ धियः २ धिया धीभ्यां धीभिः ३ धिये धीभ्यां धीभ्यः ४ धियः धीभ्यां धीभ्यः ५ धियः धियोः धियां ६ धियि धियोः धीषु ७ हे धीः हे धियौ हे धियः ८ १६ तकारांत स्त्रीलिंगः सरित् प्राब्दः सरित् सरितौ सरितः १ सरितं सरितौ सरितः २ सरिता सरिद्भ्यां सरिद्भिः ३ सरिते सरिद्भ्यां सरिद्भ्यः ४ सरितः सरिद्भ्यां सरिद्भ्यः ५ सरितः सरितोः सरितां ६ सरिति सरितोः सरित्सु ७ हे सरित् हे सरितौ हे सरितः ८ १७ धकारांतः स्त्रीलिंगः क्षुध् प्राब्दः क्षुत् क्षुधौ क्षुधः १ क्षुधं क्षुधौ क्षुधः २ क्षुधा क्षुद्भ्यां क्षुद्भिः ३ क्षुधे क्षुद्भ्यां क्षुद्भ्यः ४ क्षुधः क्षुद्भ्यां क्षुद्भ्यः ५ क्षुधः क्षुधोः क्षुधां ६ क्षुधि क्षुधोः क्षुत्सु ७ हे क्षुत् हे क्षुधौ हे क्षुधः ८ १८ षकारांतः स्त्रीलिंगः प्रावृष् प्राब्दः प्रावृट् प्रावृषौ प्रावृषः १

शिवः ७

प्रावृषं ॥ प्रावृषौ ॥ प्रावृषः ॥ २ ॥ प्रावृषा ॥ प्रावृड्भ्यां ॥ प्रावृड्भिः ॥ ३ ॥ प्राव
षे ॥ प्रा वृड्भ्यां ॥ प्रावृड्भ्यः ॥ ४ ॥ प्रावृषः ॥ प्रावृड्भ्यां ॥ प्रावृड्भ्यः ॥ ५ ॥ प्रा
वृषः ॥ प्रावृषोः ॥ प्रावृषां ॥ ६ ॥ प्रावृषि ॥ प्रावृषोः ॥ प्रावृट्सु ॥ ७ ॥ हे प्रावृ
ट् ॥ हे प्रावृषौ ॥ हे प्रावृषः ॥ १ ॥ ८ ॥ दकारांतः स्त्रीलिंगः पारच्छब्दः ॥ पा
रत् ॥ पारदौ ॥ पारदः ॥ १ ॥ पारदं ॥ पारदौ ॥ पारदः ॥ २ ॥ पारदा ॥ पारद्भ्यां ॥ पा
रद्भिः ॥ ३ ॥ पारदे ॥ पारद्भ्यां ॥ पारद्भ्यः ॥ ४ ॥ पारदः ॥ पारद्भ्यां ॥ पारद्भ्यः ॥ ५ ॥
पारदः ॥ पारदोः ॥ पारदां ॥ ६ ॥ पारदि ॥ पारदोः ॥ पारत्सु ॥ ७ ॥ हे पारत् ॥ हे
पारदौ ॥ हे पारदः ॥ १ ॥ १० ॥ रमा मति र्नदी धेनु र्वधू श्री सरित् ॥ अनंतरं
स्रक्त्वग्वाग्दृग्भ्रपरश्चैवदशैताः स्त्रीषु नायिकाः ॥ १ ॥ अकारांत नपुं
सकलिंगो ज्ञानशब्दः ॥ ज्ञानं ॥ ज्ञाने ॥ ज्ञानानि ॥ १ ॥ पुनरपि ज्ञानं ॥ ज्ञा
ने ॥ ज्ञानानि ॥ २ ॥ ज्ञानेन ॥ ज्ञानाभ्यां ॥ ज्ञानैः ॥ ३ ॥ ज्ञानाय ॥ ज्ञाना —

भ्यां ॥ ज्ञानेभ्यः ४ ॥ ज्ञानात् ॥ ज्ञानाभ्यां ॥ ज्ञानेभ्यः ॥ ५ ॥ ज्ञानस्य ॥ ज्ञानयोः ॥
ज्ञानानां ६ ॥ ज्ञाने ॥ ज्ञानयोः ॥ ज्ञानेषु ॥ ७ ॥ हे ज्ञान ॥ हे ज्ञाने ॥ हे ज्ञानानि ॥ १ ॥
११ ॥ इकारांतनपुंसकलिंगो दधिशब्दः ॥ दधि ॥ दधिनी ॥ दधीनि ॥ १ ॥ पुनर
पि दधि ॥ दधिनी ॥ दधीनि ॥ २ ॥ दध्ना ॥ दधिभ्यां ॥ दधिभिः ॥ ३ ॥ दध्ने ॥ दधि
भ्यां ॥ दधिभ्यः ॥ ४ ॥ दध्नः ॥ दधिभ्यां ॥ दधिभ्यः ॥ ५ ॥ दध्नः ॥ दध्नोः ॥ दध्नां
६ ॥ दध्नि ॥ दधिनि ॥ दध्नोः ॥ दधिषु ॥ ७ ॥ हे दधि ॥ हे दधिनी ॥ हे दधीनि ॥ १ ॥
१२ ॥ सकारांतनपुंसकलिंगः पयःशब्दः ॥ पयः ॥ पयसी ॥ पयांसि ॥ १ ॥
पुनरपि पयः ॥ पयसी ॥ पयांसि ॥ २ ॥ पयसा ॥ पयोभ्यां ॥ पयोभिः ॥ ३ ॥ प
यसे ॥ पयोभ्यां ॥ पयोभ्यः ॥ ४ ॥ पयसः ॥ पयोभ्यां ॥ पयोभ्यः ॥ ५ ॥ प
यसः ॥ पयसोः ॥ पयसां ॥ ६ ॥ पयसि ॥ पयसोः ॥ पयस्सु ॥ ७ ॥ हे पयः ॥ १ ॥ ॥ श्री ॥
हे पयसी ॥ हे पयांसि ॥ १ ॥ १३ ॥ मकारांतनपुंसकलिंगो वर्मशब्दः ॥ वर्म ॥ ॥ ५ ॥

वर्मणी वर्माणि १ पुनरपि वर्म वर्मणी वर्माणि २ वर्मणा वर्मभ्यां
वर्मभिः ३ वर्मणे वर्मभ्यां वर्मभ्यः ४ वर्मणः वर्म ॥ भ्यां वर्मभ्यः
५ वर्मणः वर्मणोः वर्मणां ६ वर्मणि वर्मणोः वर्मसु ७ हे वर्म हे वर्म
णी हे वर्माणि १ ७ षकारांतनपुंसकलिंगो धनुःशब्दः धनुः धनु
षी धनूंषि १ पुनरपि धनु धनुषी धनूंषि २ धनुषा धनुर्भ्यां ध
नुर्भिः ३ धनुषे धनुर्भ्यां धनुर्भ्यः ४ धनुषः धनुर्भ्यां धनुर्भ्यः ५
धनुषः धनुषोः धनुषां ६ धनुषि धनुषोः धनुःषु ७ हे धनुः हे ध
नुषी हे धनूंषि १ ५ इकारांतनपुंसकलिंगो वारिशब्दः वारि वा
रिणी वारीणि पुनरपि वारि वारिणी वारीणि २ वारिणा वारि
भ्यां वारिभिः ३ वारिणे वारिभ्यां वारिभ्यः ४ वारिणः वारिभ्यां
वारिभ्यः ५ वारिणः वारिणोः वारिणां ६ वारिणि वारिणोः वा

रिपु १ हे वारि हे वारिणी हे वारीणि ॥ ८ ॥ तकारांतनपुंसकलिंगे जग
च्छब्दः जगत् जगती जगंती १ पुनरपि जगत् जगती जगंती
२ जगता जगद्भ्यां जगद्भिः ३ जगते जगद्भ्यां जगद्भ्यः ४ ज
गतः जगद्भ्यां जगद्भ्यः ५ जगतः जगतो जगतां ६ जगति
जगतोः जगत्सु ७ हे जगत् हे जगती हे जगंती ॥ ८ ॥ उकारांत न
पुंसकलिंगे मधुशब्दः मधु मधुनी मधूनि १ पुनरपि मधु मधु
नी मधूनि २ मधुना मधुभ्यां मधुभिः ३ मधुने मधुभ्यां मधु
भ्यः ४ मधुनः मधुभ्यां मधुभ्यः ५ मधुनः मधुनोः मधूनां
६ मधुनि मधुनोः मधुषु ७ हे मधु हे मधुनी हे मधूनी ॥ ८ ॥
नकारांतनपुंसकलिंगे नामशब्दः नाम नामनी नामानि १ ॥ श्रीवः
पुनरपि नाम नामनी नामानि २ नाम्ना नामभ्यां नामभिः ३ ॥ हा

३ नाम्ने नामभ्यां नामभ्यः ४ नाम्नः नामभ्यां नामभ्यः ५ नाम्न
ः नाम्नोः नाम्नां ६ नाम्नि नामलि नाम्नोः नामसु ७ हे नाम
हे नामनी हे नामानि ८ इकारांतनपुंसकलिंगो मनोहारिशब्दः
मनोहारि मनोहारिणी मनोहारिणि मनोहारिणा मनोहारि
भ्यां मनोहारिभिः ३ शेषं वारिवत् आनंदधिपयोवर्मधनुर्वारि
जगत्तथा मधुनाम मनोहारि दृष्टो तानि नपुंसके २ इति नपुं
लिंगः दकारांतः पुल्लिंगस्तत्शब्दः सः तौ ते १ तं तौ तान्
२ तेन ताभ्यां तैः ३ तस्मै ताभ्यां तेभ्यः ४ तस्मात् ता
तेभ्यः ५ तस्य तयोः तेषां ६ तस्मिन् तयोः तेषु ७
स्त्रीलिंगस्तच्छब्दः सा ते ताः १ तां ते ताः २ तया ताभ्यां ता
भिः ३ तस्यै ताभ्यां ताभ्यः ४ तस्याः ताभ्यां ताभ्यः ५ तस्याः

तयोः तासां ६ तस्यां तयोः तासु ७ इ कारांतनपुंसकलिंगस्तच्छ
ब्दः तत् ते तानि १ पुनरपि तत् ते तानि शेषं पुंल्लिंगवत् इका
रांत पुंल्लिंगो यच्छब्दः यः यौ ये १ यं यौ यान् २ येन या
भ्यां यैः ३ यस्मै याभ्यां येभ्यः ४ यस्मात् याभ्यां येभ्यः ५ य
स्य ययोः येषां ६ यस्मिन् ययोः येषु ७ इकारांतः स्त्रीलिंगो य
च्छब्दः या ये याः १ पुनरपि यां ये याः २ यया याभ्यां याभिः
३ यस्यै याभ्यां याभ्यः ४ यस्याः याभ्यां याभ्यः ५ यस्याः
ययोः यासां ६ यस्यां ययोः यासु ७ इकारांतनपुंसकलिंगो य
च्छब्दः यत् ये यानि १ पुनरपि यत् ये यानि २ शेषं पुंल्लिंगव
त् मकारांतः पुंल्लिंगः किंशब्दः कः कौ के १ कं कौ कान् २
केन काभ्यां कैः ३ कस्मै काभ्यां केभ्यः ४ कस्मात् काभ्यां

शिवः ७

केभ्यः ॥ ५ कस्य कयोः केषां ॥ ६ कस्मिन् कयोः केषु ७ मकारांतः
स्त्रीलिंगः किंशब्दः का के काः ॥ १ कां के काः ॥ २ कया काभ्यां
काभिः ३ कस्यै काभ्यां काभ्यः ॥ ४ कस्याः काभ्यां काभ्यः ॥ ५
कस्याः कयोः कासां ६ कस्यां कयोः कासु ७ मकारांतः नपुंसक
लिंगः किंशब्दः किं के कानि १ पुनरपि किं के कानि २ शेषं पुं
वत् ॥ छ ॥ दकारांतः पुंलिंगो युष्मच्छब्दः त्वं युवां यूयं १ त्वां वा
युवां वां युष्मान् वः २ त्वया युवाभ्यां युष्माभिः ३ तुभ्यं ते
युवाभ्यां वां युष्मभ्यं वः ४ त्वत् युवाभ्यां युष्मत् ५ तव ते यु
वयोः वां युष्माकं वः ६ त्वयि युवयोः युष्मासु ७ दकारांतः पुं
लिंगः अस्मच्छब्दः अहं आवां वयं १ मां मा आवां नौ अ
स्मान् नः २ मया आवाभ्यां अस्माभिः ३ मह्यं मे आवाभ्यां

५ एषां ऽस्मिन् ऽनयोः

नौ ऽस्मभ्यं नः ४ मत् ऽआवाभ्यां ऽस्मत् ५ मम मे ऽआवयोः नौ ऽस्माकं नः ६ मयि ऽआवयोः ऽस्मासु ७ मकारांतः पुंलिंग इदम् शब्दः ऽयं इमौ इमे १ इमं इमौ इमान् २ ऽनेन ऽआभ्यां एभिः ३ ऽस्मै ऽआभ्यां एभ्यः ४ ऽस्मात् ऽआभ्यां एभ्यः ५ ऽस्य ऽनयोः एषु ७ मकारांत स्त्रीलिंग इदम् शब्दः इयं इमे इमाः १ इमां इमे इमाः २ ऽनया ऽआभ्यां ऽआभिः ३ ऽस्यै ऽआभ्यां ऽआभ्यः ४ ऽस्याः ऽआभ्यां ऽआभ्यः ५ ऽस्याः ऽनयोः ऽआसां ६ ऽस्यां ऽनयोः ऽआसु ७ मकारांत नपुंसकलिंग इदम् शब्दः इदं इमे इमानि १ पुनरपि इदं इमे इमानि २ ऽनेन ऽआभ्यां एभिः ३ ऽस्मै ऽआभ्यां एभ्यः ४ ऽस्मात् ऽआभ्यां एभ्यः ५ ऽस्य ऽनयोः एषां ६ ऽस्मिन् ऽनयोः एषु ७ दकारांत पुंलिं

शिवः

८

गएतछब्दः एष॥ [illegible] एते १ एतं एतौ एतान् २ एनं एनौ एना

न् २ एतेन एताभ्यां एतैः ३ एतस्मै एताभ्यां एतेभ्यः ४ एतस्मा

त् एताभ्यां एतेभ्यः ५ एतस्य एतयोः एनयोः एतेषां ६ एत

स्मिन् एतयोः एनयोः एतेषु ७ दकारांत स्त्रीलिंग एत[illegible]दः

एषा एते एताः १ एतां एते एताः २ एनां एने एनाः २ एतया

एताभ्यां एताभिः ३ एतस्यै एताभ्यां एताभ्यः ४ एतस्याः एताभ्यां

एताभ्यः ५ एतस्याः एतयोः एतासां ६ एतस्यां एनयोः एता

सु ७ दकारांत नपुंसकलिंग एतछब्दः एतत् एते एतानि १ पुन

रपि एतत् एते एतानि २ एनत् एने एनानि २ एतेन एता

भ्यां एतैः ३ एतस्मै एताभ्यां एतेभ्यः ४ एतस्मात् एताभ्यां एते

भ्यः ५ एतस्य एतयोः एतेषां ६ एतस्मिन् एतयोः एतेषु ७

दकारांत स्त्रीलिंग एतच्छब्दः ॥ एषा ॥ एते ॥ एताः ॥१॥ एतां ॥ एते ॥ एताः ॥२॥
एनां ॥ एने ॥ एनाः ॥२॥ एतया ॥ एताभ्यां ॥ एताभिः ॥३॥ एतस्यै ॥ एताभ्यां ॥
एताभ्यः ॥४॥ एतस्याः ॥ एताभ्यां ॥ एताभ्यः ॥५॥ एतस्याः ॥ एतयोः ॥ एता-
सां ॥६॥ एतस्यां ॥ एतयोः ॥ एतासु ॥७॥ दकारांत नपुंसकलिंग एतच्छब्दः ॥
एतत् ॥ एते ॥ एतानि ॥ पुनरपि ॥ एतत् ॥ एते ॥ एतानि ॥२॥ एनत् ॥ एने
एनानि ॥२॥ एतेन ॥ एताभ्यां ॥ एतैः ॥३॥ एतस्मै ॥ एताभ्यां ॥ एतेभ्यः ॥४॥
एतस्मात् ॥ एताभ्यां ॥ एतेभ्यः ॥५॥ एतस्य ॥ एनयोः ॥ एतेषां ॥६॥ एतस्मि-
न् ॥ एतयोः ॥ एतेषु ॥७॥ सकारांतः पुंलिंग अदस्शब्दः ॥ असौ ॥ अ-
मू ॥ अमी ॥१॥ अमुं ॥ अमू ॥ अमून् ॥२॥ अमुना ॥ अमीभ्यां ॥ अमी-
भिः ॥३॥ अमुष्मै ॥ अमीभ्यां ॥ अमीभ्यः ॥४॥ अमुष्मात् ॥ अमीभ्यां ॥ अ-
मीभ्यः ॥५॥ अमुष्य ॥ अमुयोः ॥ अमीषां ॥६॥ अमुष्मिन् ॥ अमुयोः ॥ अ-

॥ शिवः ॥ ए ॥

मीषु ७ ॥ स[illegible] स्त्रीलिंग ऽअदस्शब्दस्य ॥ ऽअसौ ॥ ऽअमू ॥ ऽअमूः १ ॥ ऽअ
मुं ॥ ऽअमू ऽअमूः २ ऽअमुया ॥ ऽअमूभ्यां ॥ ऽअमूभिः ॥ ३ ॥ ऽअमुष्यै ॥ ऽअमू
भ्यां ॥ ऽअमूभ्यः ४ ऽअमुष्याः ॥ ऽअमूभ्यां ऽअमूभ्यः ॥ ५ ॥ ऽअमुष्याः ऽअ
मुयोः ॥ ऽअमूषां ६ ॥ ऽअमुष्यां ॥ ऽअमुयोः ॥ ऽअमूषु ७ ॥ स कारांत नपुं
सकलिंग ऽअदस्शब्दः ॥ ऽअदः ॥ ऽअमूनि ॥ ऽअमूनि १ ॥ पुनरपि ऽअ
दः ॥ ऽअमू ॥ ऽअमूनि २ ऽअमुना ॥ ऽअमीभ्यां ॥ ऽअमीभिः ॥ ३ ॥ ऽअमु
ष्मै ॥ ऽअमीभ्यां ऽअमीभ्यः ॥ ४ ॥ ऽअमुष्मात् ॥ ऽअमीभ्यां ॥ ऽअमीभ्यः
५ ॥ ऽअमुष्य ऽअमुयोः ॥ ऽअमीषां ॥ ६ ॥ ऽअमुष्मिन् ऽअमुयोः ॥ ऽअमी
षु ७ ॥ संसातराघ्मयायथ्वेकः को किं त्वमदं त्वयं इयदेदं वैषवै
षा एतद्यासावसावदः ॥ इति शब्दाः ॥ ७ ॥ भूसत्तायां परस्मैपदि क
र्तरि वर्तमाने लट् ॥ भवति ॥ भवतः ॥ भवंति १ ॥ भवसि ॥ भवथः ॥ भ

वथ॥३॥ नवामि॥ नवावः॥ नवामः॥३॥ नूतार्थे लिट्॥ बनूव॥ बनूवतुः॥
बनूवुः॥ बनूविथ॥ बनूवथुः॥ बनूव॥३॥ बनूव॥ बनूविव॥ बनूविम॥३॥
नविष्यदर्थे लुट्॥ नविता॥ नवितारौ॥ नवितारः॥३॥ नवितासि॥ नवि
तास्थः॥ नवितास्थ॥३॥ नवितास्मि॥ नवितास्वः॥ नवितास्मः॥३॥ न
विष्यदर्थे लृट्॥ नविष्यति॥ नविष्यतः॥ नविष्यंति॥३॥ नविष्यसि॥ न
विष्यथः॥ नविष्यथ॥३॥ नविष्यामि॥ नविष्यावः॥ नविष्यामः॥३॥ लो
ट् छंदसि॥ आशिषि लोट्॥ नवतु॥ नवतात्॥ नवतां॥ नवंतु॥३॥ नव
नवतात्॥ नवतं॥ नवत॥३॥ नवानि॥ नवाव॥ नवाम॥३॥ नूतार्थे
लङ्॥ अनवत्॥ अनवतां॥ अनवन्॥३॥ अनवः॥ अनवतं॥ अ
नवत॥३॥ अनवं॥ अनवाव॥ अनवाम॥३॥ विध्यादौ लिङ्॥ नवेत्
नवेतां॥ नवेयुः॥३॥ नवेः॥ नवेतं॥ नवेत॥३॥ नवेयं॥ नवेव॥ नवेम

॥ प्रिवः॥
॥२०॥

आशिषि ॥ ... ॥ भूयात् ॥ भूयास्तां ॥ भूयासुः ॥ ॥ भूयाः ॥ भूयास्तं
भूयास्त ॥ २ ॥ भूयासं ॥ भूयास्व ॥ भूयास्म ॥ ३ ॥ भूते लुङ् ॥ अभूत् ॥ अ
भूतां ॥ अभूवन् ॥ ॥ अभूः ॥ अभूतं ॥ अभूत ॥ २ ॥ अभूवं ॥ अभूव
अभूम ॥ ३ ॥ भविष्यदर्थे लृङ् ॥ अभविष्यत् ॥ अभविष्यतां ॥ अभविष्यन्
॥ अभविष्यः ॥ अभविष्यतं ॥ अभविष्यत ॥ २ ॥ अभविष्यं ॥ अभविष्या
व ॥ अभविष्याम ॥ ३ ॥ इति परस्मैपदं ॥ भवति दि ॥ बभूव ॥ भविता ॥ भवि
ष्यति ॥ भवतु ॥ अभवत् ॥ भवेत् ॥ भूयात् ॥ अभूत् ॥ अभविष्यत् ॥ परस्मैपदिनः ॥
॥ एध वृद्धौ ॥ आत्मनेपदं वर्तमाने लट् ॥ एधते ॥ एधेते ॥ एधंते ॥ एध
से ॥ एधेथे ॥ एधध्वे ॥ २ ॥ एधे ॥ एधावहे ॥ एधामहे ॥ ३ ॥ [illegible] ॥
ऐधत ॥ ऐधेतां ॥ ऐधंत ॥ ऐधथाः ॥ ऐधेथां ॥ ऐधध्वं ॥ २ ॥ ऐधे ॥ ऐधावहि
ऐधामहि ॥ विध्यादौ लिङ् ॥ एधेत ॥ एधेयातां ॥ एधेरन् ॥ एधेथाः ॥

एधेयाथां एधेध्वं २ एधेय एधेवहि एधेमहि ३ ७ आशिषि लिङ् एधिषीष्ट एधिषीयास्तां एधिषीरन् १ एधिषीष्ठाः एधिषीयास्थां एधिषीध्वं २ एधिषीय एधिषीवहि एधिषीमहि ३ ८ लुङ् ऐधिष्ट ऐधिषातां ऐधिषत १ ऐधिष्ठाः ऐधिषाथां ऐधिध्वं २ ऐधिषि ऐधिष्वहि ऐधिष्महि ३ भविष्यदर्थे लृङ् ऐधिष्यत ऐधिष्येतां ऐधिष्यंत १ ऐधिष्यथाः ऐधिष्येथां ऐधिष्यध्वं २ ऐधिष्ये ऐधिष्यावहि ऐधिष्यामहि ३ इत्यात्मनेपदं एधत एधां चक्रे एधिता एधिष्यंत ऐधत तैधेये ऐधत चैधेत तथाप्येधिषीष्टैधिष्ट चैधिष्यत ॥२॥ ७

अथ समासविधिः कथ्यते श्री द्वयोः पदयोस्त्रयाणां पदानां वा संमुच्चयविशिष्टानि यानि समासः ऐकपद्यं समासप्रयोजनं स च तुर्विधः अव्ययीभावः तत्पुरुषः बहुव्रीहि द्वंद्वश्चेति पूर्वपदा ॥ शिवः

॥२१॥

४ ॥

र्थं यथा नि [illegible] नी [illegible] तत्पुरुषः ॥ अन्यपदार्थप्रधा
नो बहुव्रीहिः ॥ उभयपदार्थप्रधानो द्वंद्वः ॥ तत्पुरुषो द्विविधः ॥ व्यधिक
रणः ॥ समानाधिकरणश्चेति ॥ तत्र समानाधिकरणो यदा द्विविधः ॥
तदा कर्मधारयो द्विगुश्चेति ॥ तत्र षोढा समासा उच्यंते ॥ तत्पुरुषः
कर्मधारयः ॥ द्विगुः बहुव्रीहिः द्वंद्वो अव्ययीभावश्चेति ॥ तत्र तत्पुरुषो व्य
धिकरणसंज्ञायामष्टविधो भवति ॥ प्रथमा तत्पुरुषो द्वितीयातत्पुरु
षः ॥ तृतीयातत्पुरुषः ॥ चतुर्थीतत्पुरुषः ॥ पंचमीतत्पुरुषः ॥ षष्ठीतत्पुरुषः
सप्तमीतत्पुरुषः ॥ नञ्तत्पुरुषश्चेति ॥ तत्र प्रथमातत्पुरुषो यथा
अर्धं पिप्पल्याः अर्धपिप्पली ॥ द्वितीयातत्पुरुषो यथा [illegible] कृष्णं श्रि
तः कृष्णाश्रितः ॥ तृतीयातत्पुरुषो यथा ॥ धान्येन [illegible] धान्यार्थः
चतुर्थीतत्पुरुषो यथा ॥ ब्राह्मणाय हितं ब्राह्मणहितं ॥ पंचमीतत्पु

चमो ४

22

रुषो यथा । चोराद्भयं चोरभयं । षष्ठीतत्पुरुषो यथा । कृष्णस्य भक्तः कृष्णभक्तः । स
प्तमीतत्पुरुषो यथा । अक्षेषु शौंडः अक्षशौंडः । नञ्तत्पुरुषो यथा । न ब्राह्मण
अब्राह्मणः । अथ कर्मधारयः सप्तविधः । विशेषणपूर्वपदः । विशेषणोत्तरपदः
विशेषणोभयपदः । उपमानपूर्वपदः । उपमानोत्तरपदः । संभावनापूर्वपदः ।
पूर्वपद
अवधारणश्चेति । विशेषणपूर्वपदो यथा । श्वेतश्चासौ अश्वश्च श्वेताश्वः । वि
शेषणोत्तरपदो यथा । वैयाकरणश्चासौ खसूचिश्च वैयाकरणखसूचिः । वि
शेषणोभयपदो यथा । शीतं च तत् उष्णं च शीतोष्णं । मध्यपदलोपी कर्मधार
यो यथा । शाकप्रियश्चासौ पार्थिवश्च शाकपार्थिवः । उपमानपूर्वपदो यथा
घन इव श्यामः घनश्यामः । उपमानोत्तरपदो यथा । नरः सिंह इव नरसिंहः ।
संभावनापूर्वपदो यथा । गुण इति बुद्धिः गुणबुद्धिः । अवधारणपूर्वपदो यथा ।
मानमेव धनं मानधनं । इति कर्मधारयः । द्विगुः समासो द्विविधः । एकवद्भावो

ऽनेकवचनावयवेति संख्यापूर्वो द्विगुः ॥ एकवचनावो द्विगुर्यथा ॥ त्रीणि शृंगाणि
समान्नानि त्रिशृंगं ॥ अनेकवचनावो यथा ॥ सप्त च ते ऋषयश्च सप्तर्षयः ॥
इकारांतोत्तरपदो द्विगुस्त्रियां ॥ अन्यथा नपुंसक एव ॥ पंचानां [illegible]नां स[illegible] ३ यथा
माहारः षट्पदी ॥ त्रयाणां गुरूणां समाहारस्त्रिगुरुः ॥ इति द्विगुः ॥ ॥ अथा
नेकविधो बहुव्रीहिः ॥ द्विपदबहुपदसहपूर्वपदसंख्योत्तरपदसंख्योभय
पदव्यतिहारलक्षणं दिगंतरालक्षणेति ॥ द्विपदो यथा ॥ चित्रा गावो यस्य
सः चित्रगुः ॥ बहुपदो यथा ॥ अधिकः उन्नतः अंसः यस्यासौ अधिकोन्न
तांसः ॥ सहपूर्वपदो यथा ॥ सहलक्ष्मनवर्त्तत इति सलक्ष्मः ॥ [illegible]रोत्तरपदो
यथा ॥ नार्या सह वर्त्तत इति सनार्यः ॥ संख्योभयपदो यथा ॥ द्वौ वा त्रयो वा
द्वित्राः ॥ व्यतिहारलक्षणो यथा ॥ [illegible] गृहीत्वा [illegible] युद्धं प्रवर्त्तते इ
ति केशाकेशि ॥ दिगंतरालक्षणो यथा ॥ दक्षिणश्च पूर्वस्याश्च दिशोर्यदंतरालं
स्या

सादक्षिणपूर्वा ॥ इति बहुव्रीहिः ॥ २ ॥ द्वंद्वोपि द्विविधः इतरेतरः समाहारश्चेति
इतरेतरो यथा रामश्च लक्ष्मणश्च रामलक्ष्मणौ ॥ प्राणितूर्यसेनांगानां समा
हारे एकवद्भावः प्राण्यंगं यथा पाणी च पादौ च मुखं च पाणिपादमुखं तूर्यां
गं यथा मार्दंगिकाश्च वैणविकाश्च मार्दंगिकवैणविकं सेनांगं यथा राज
न्याश्च रथ्याश्च अश्वाश्च राजन्यरथ्याश्वं ॥ इति द्वंद्वः ॥ ३ ॥ अव्ययीभावोपि द्वि
विधः वीप्साव्ययीभावो विभक्त्यव्ययीभावश्चेति ॥ वीप्साव्ययीभावो यथा
तटं तटं प्रत्यनुतटं ॥ विभक्तौ यथा कुंभस्य समीपे वर्तत इत्युपकुंभं अव्य
यीभावस्याव्ययित्वात् त्रिषु लिंगेषु समानं रूपं ॥ इत्यव्ययीभावः ॥ ४ ॥ अन्येपि
समासाः ॥ लुक्समासोऽलुक्समासश्चेति ॥ लुक्समासो यथा ग्रामं
श्रितो ग्राम [illegible] श्रितः ॥ अलुक्समासो यथा वने चरतीति वनेचरः
इति समासाः ॥ रामो विराजते रामो भूमंडलमपालयत् ॥ रामचंद्रो दश

॥ प्रिव: ॥
॥ २२ ॥

ग्रीवंपरलोकमनीनयत् रामेणसाध्यतेकीर्त्तिरामचंद्रेणस्सूयते प्रथमांतः
कर्त्ता द्वितीयांतंकर्म तृतीयांतःकर्त्ता प्रथमांतंकर्म तृतीयांतंकरणं ॥
चतुर्थ्यांतंसंप्रदानं पंचम्यंतमपादानं षष्ठ्यर्थःसंबंधः सप्तम्यंतमधिक
रणं यदाकर्त्तरिप्रथमाविभक्तिर्भवतितदाकर्मणिद्वितीया यथादेवद
त्तःतंदुलंपचति यदाकर्त्तरितृतीयाविभक्तिर्भवतितदाकर्मणिप्रथमा
यथादेवदत्तेनतंदुलाःपच्यंते अकर्मककर्त्तरिप्रयोगो यथा रामःविरा
जते सकर्मककर्त्तरिप्रयोगो यथा रामःभूमंडलंअपालयत् द्विकर्म
ककर्त्तरिप्रयोगो यथा रामःचंद्रःदशग्रीवंपरलोकंअनीनयत् कर्म
णिप्रयोगो यथा रामेणकीर्तिःसाध्यते भावेप्रयोगो यथा रामचंद्रेण
स्सूयते कारकप्रयोगो यथा देवदत्तेनकृतं इतिप्रयोगः प्रथमांतस्य
युष्मच्छब्दस्यप्रयोगेमध्यमपुरुषःप्रयोक्तव्यः यथा त्वंभवसि युवांभ

वयः॥ यूयं भवथ॥ प्रथमांतस्य अस्मत् शब्दस्य प्रयोगे उत्तमपुरुषः प्रयोक्त
व्यः॥ यथा अहं भवामि॥ आवां भवावः॥ वयं भवामः॥ एतद्व्यतिरिक्तानां स
र्वेषां प्रथमांतानां प्रयोगे प्रथमपुरुषः प्रयोक्तव्यः॥ यथा॥ सः भवति॥ तौ भव
तः॥ ते भवंति॥ तो ते प्रथमा॥ त्याते त्या प्रतिद्वितीया॥ तेणे करून तेही करू
न तेणे सी तेणे तृतीया॥ त्या कारणे त्यां कारणे तदर्थ चतुर्थी॥ त्या स्तव
त्या पासून त्याहून पंचमी॥ त्याचा त्यास संबंधे षष्ठी॥ त्याचा ठांयी त्याचे वि
षयीं त्या मध्ये सप्तमी॥ असता सप्तमी॥ इति शब्दसमाप्तः॥ श्री॥ श्री॥

सा

॥ शिवः॥
॥ २८॥

साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकाभाववद्वृत्तित्वं हि व्यभिचारः॥

घं

१ ॐ स्वस्ति श्रीगणेशाय नमः श्रीगुरुभ्यो नमः॥ श्रीसरस्वत्यै नमः॥ निधाय हृदि विश्वेशं विधाय गुरुवंदनं॥ बाला
नां सुखबोधाय क्रियते तर्कसंग्रहः॥१॥ तत्र द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः॥ सप्तैव पदार्थाः॥ तत्र
द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव॥ रूपरसगंधस्पर्शसंख्यापरिमाणपृथक्त्वसंयो
गविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशति
गुणाः॥ उत्क्षेपणापक्षेपणाकुंचनप्रसारणगमनानि॥ पंचैव कर्माणि॥ परमपरं चेति॥ द्विविधं सामान्यं॥ नित्यद्र
व्यवृत्तयो॥ विशेषास्त्वनंता एव॥ समवायस्त्वेक एव॥ अभावश्चतुर्विधः॥ प्रागभावः॥ प्रध्वंसाभावोऽ
त्यंताभावोऽन्योन्याभावश्चेति॥ तत्र गंधवती पृथिवी॥ सा द्विविधा॥ नित्याऽनित्या च॥ नित्या परमाणुरूपा
॥ अनित्या कार्यरूपा॥ पुनस्त्रिविधा॥ शरीरेंद्रियविषयभेदात्॥ शरीरमस्मदादीनां॥ इंद्रियं गंधग्राहकं घ्रा
णं नासाग्रवर्त्ति॥ विषयो मृत्पाषाणादिः॥ शीतस्पर्शवत्य आपः॥ ताश्च द्विविधा॥ नित्या अनित्याश्च॥ नि
त्याः परमाणुरूपाः॥ अनित्याः कार्यरूपाः॥ पुनस्त्रिविधाः॥ शरीरेंद्रियविषयभेदात्॥ शरीरं वरुणलोके॥ इंद्रि
यं रसग्राहकं॥ रसनं जिह्वाग्रवर्त्ति॥ विषयः सरित्समुद्रादिः॥ उष्णस्पर्शवत्तेजः॥ तच्च द्विविधं नित्यमनित्यं च॥
नित्यं परमाणुरूपं अनित्यं कार्यरूपं॥ पुनस्त्रिविधं॥ शरीरेंद्रियविषयभेदात्॥ शरीरमादित्यलोके॥ इंद्रियं
रूपग्राहकं चक्षुः कृष्णताराग्रवर्त्ति॥ विषयश्चतुर्विधः॥ भौमदिव्योदर्याकरजभेदात्॥ भौमं वह्न्यादिकं
अबिंधनं दिव्यं विद्युदादिः॥ भुक्तस्य परिणामहेतुरौदर्यं आकरजं सुवर्णादि॥ रूपरहितस्पर्शवान् वायुः॥ स द्वि
विधः नित्योऽनित्यश्च। नित्यः परमाणुरूपः॥ अनित्यः कार्यरूपः॥ पुनस्त्रिविधः॥ शरीरेंद्रियविषयभेदात्॥
शरीरं वायुलोके॥ इंद्रियं स्पर्शग्राहकं॥ त्वक् सर्वशरीरवर्त्ति॥ विषयो वृक्षादिकंपहेतुः॥ शरीरांतः १

संचारीवायुः प्राणः स एको प्युपाधिभेदात्॥ प्राणापानादि संज्ञां लभते॥ शब्दगुणमाकाशं तच्चैकं विभु
र्नित्यं च॥ अतीतादिव्यवहारहेतुः कालः॥ स चैको विभुर्नित्यश्च॥ प्राच्यादिव्यवहारहेतुर्दिक्॥ सा चैका
विभ्वी नित्या च॥ ज्ञानाधिकरणमात्मा स द्विविधः॥ परमात्मा जीवात्मा चेति तत्रेश्वरः॥ सर्वज्ञः परमा
त्मा एक एव जीवात्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्च॥ सुखाद्युपलब्धि॥ साधनमिंद्रियं मनः तच्च प्र
त्यात्मनियतत्वादनंतमणुरूपं नित्यं च॥ चक्षुर्मात्रग्राह्यो गुणो रूपं॥ तच्च शुक्लनीलपीतरक्तहरितक
पिशचित्रभेदात् सप्तविधं॥ पृथिव्याप्तेजोवृत्ति तत्र पृथिव्यां सप्तविधं॥ अभास्वरं शुक्लं जले भास्व
रं तेजसि रसनाग्राह्यो गुणो रसः॥ स च मधुराम्ललवणकटुकषायतिक्त भेदात् षड्विधः पृथिवीजलवृ
त्तिः तत्र पृथिव्यां षड्विधः जले मधुर एव॥ घ्राणग्राह्यो गुणो गंधः स च द्विविधः सुरभिरसुरभिश्च पृथिवी
मात्रवृत्तिः॥ त्वगिंद्रियमात्रग्राह्यो गुणः स्पर्शः॥ स च त्रिविधः॥ शीतोष्णा शीत भेदात्॥ पृथिव्यप्तेजोवायुवृ नुष्णा
त्तिः॥ तत्र शीतं जले उष्ण न स्तेजसि॥ अनुष्णाशीतः॥ पृथिवीवाय्वोः रूपादिचतुष्टयं पृथिव्यां पाकजमनि
त्यं॥ अन्यत्रापाकजं नित्यमनित्यं च॥ नित्यगतं नित्यं॥ अनित्यगतं अनित्यं॥ एकत्वादिव्यवहारहेतुः॥
संख्या नवद्रव्यवृत्तिः एकत्वादिपरार्द्धपर्यंता॥ एकत्वं नित्यगतं नित्यं॥ अनित्यगतमनित्यं॥ द्वित्वादि
कं तु सर्वत्रानित्यमेव॥ मानव्यवहारासाधारणं कारणं परिमाणं नवद्रव्यवृत्ति॥ तच्चतुर्विधं अणुम

24

तर्क०

साधर्म्य १

व्य° २
सर्वद्रव्यवृत्तिः
२

इदंभिन्नंचेतिपृथक्व्यवहारासाधारणकारणं पृथक्त्वं सर्वद्रव्यवृत्ति॥ संयुक्तव्यवहारहेतुः संयो
गः॥ संयोगनाशको गुणो विभागः॥ सर्वद्रव्यवृत्तिः॥ परापरव्यवहारासाधारणकारणे परत्वापरत्वे॥ ते
द्विविधे॥ दिक्कृते का[illegible]लकृते चेति दूरस्थे दिक्कृतं परत्वं॥ समीपस्थे दिक्कृतमपरत्वं ज्येष्ठे कालकृ
तं परत्वं॥ कनिष्ठे कालकृतमपरत्वं॥ आद्यपतनासमवायिकारणं गुरुत्वं पृथिवीजलवृत्ति॥ स्यंदनास
मवायिकारणं द्र[illegible]वत्वं॥ पृथिवी[illegible]जोवृत्ति॥ तद्द्विविधं॥ सांसिद्धिकं नैमित्तिकं चेति॥ सांसिद्धिकं ज
ले नैमित्तिकं॥ पृथिवीतेजसोः॥ पृथिव्यां घृतादावग्निसंयोगजं द्रवत्वं॥ तेजसि सुवर्णादौ॥ चूर्णादिपिं
डीभावहेतुर्गुणः॥ स्नेहः जलमात्रवृत्तिः॥ श्रोत्रग्राह्यो गुणः शब्दः॥ आकाशमात्रवृत्तिः॥ स द्विविधः॥ ध्वन्या
त्मको वर्णात्मकश्चेति॥ ध्वन्यात्मको भेर्यादौ॥ वर्णात्मकः संस्कृतभाषादिरूपः॥ सर्वव्यवहारहेतुः॥
बुद्धिर्ज्ञानं सा द्विविधा स्मृति[illegible]रनुभवश्चेति॥ संस्कारजन्यं ज्ञानं स्मृतिः॥ तद्भिन्नं ज्ञानमनुभवः॥ सा
द्विविधा यथार्थोऽयथार्थश्चेति तद्वति तत्प्रकारको यथार्थः॥ यथायं घट इत्यादिज्ञाने सैव प्रमेत्युच्य
ते तदभाववति तत्प्रकारकोनुभवोऽयथार्थः॥ यथा शुक्ताविदं रजतमित्यादिज्ञाने॥ यथार्थोनुभव
श्चतुर्विधः॥ प्रत्यक्षानुमित्युपमितिशाब्दभेदात्॥ तत्करणमपि चतुर्विधं॥ प्रत्यक्षानुमानोपमा
नशाब्दभेदात्॥ असाधारणं [illegible]कारणं करणं॥ अन्यथासिद्धकार्यनियतपूर्ववृत्तिका

नुभवो २

३

वा

रणं॥ कार्य्यमुत्पद्यते यत्र तत्प्रागभाववृत्तियाणि॥ कारणं त्रिविधं॥ समवाय्यसमवायिनिमित्तभेदात्॥ यत्समवेतं
कार्य्यमुत्पद्यते तत्समवायिकारणं यथा तंतवः पटस्य कारणं॥ पटश्च स्वगतरूपादेः॥ कार्येण कारणेन च सहैकस्मि
न्नर्थे समवेतत्वे सति कारणमसमवायिकारणं॥ यथा तंतुसंयोगः पटस्य तंतुरूपं पटगतरूपस्य॥ तदुभयभिन्नं
निमित्तकारणं॥ यथा तुरीयवेमादिकं पटस्य॥ तदेवत्रिविधकारणमध्ये यदसाधारणं कारणं तदेव क
रणं॥ तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षं॥ इंद्रियार्थसंनिकर्षजन्यं ज्ञानं प्रत्यक्षं॥ तद्द्विविधम्॥ निर्विकल्पकम्॥
सविकल्पकं च तत्र निःप्रकारकं ज्ञानं निर्विकल्पकम्॥ सप्रकारकं ज्ञानं सविकल्पम्॥ यथा डित्थोयं ब्रा
ह्मणोयं श्यामोयमिति॥ प्रत्यक्षज्ञानहेतुरिंद्रियार्थसन्निकर्षः॥ षड्विधः॥ संयोगः संयुक्तसमवायः॥ संयुक्तस
मवेतसमवायः॥ समवायः॥ समवेतसमवायो विशेषणविशेष्यभावश्चेति॥ चक्षुषा घटस्य प्रत्यक्षजनने सं
योगः सन्निकर्षः॥ घटरूपप्रत्यक्षे संयुक्तसमवायः सन्निकर्षः॥ चक्षुः संयुक्ते घटे रूपस्य समवायात्॥ रूपत्वसा घट
मान्यप्रत्यक्षे संयुक्तसमवेतसमवायः॥ सन्निकर्षः॥ चक्षुः संयुक्ते घटे घटरूपं समवेतं तत्र रूपत्वस्य समवायात् म४
श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः॥ कर्णविवरऽवच्छिन्नाकाशस्य श्रोत्रत्वात्॥ शब्दस्य
आकाशगुणत्वात्॥ गुणगुणिनोश्च समवायात्॥ शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः
श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात्॥ अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः॥ घ

त॰ सं॰
२

टाभाववद्भूतलमित्यत्र चक्षुःसंयुक्तविशेषणत्वाद्भूतले घटाभावस्य विशेषणत्वात्॥ एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं॥ तत्कारणमिंद्रियं॥ तस्मादिंद्रियं प्रत्यक्षप्रमाणमिति सिद्धं॥ अनुमितिकरणमनुमानं॥ परामर्शजन्यं ज्ञानमनुमितिः॥ व्याप्तिविशिष्टपक्षधर्मताज्ञानं परामर्शः॥ यथा वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानं परामर्शः॥ तज्जन्यं पर्वतो वह्निमानिति ज्ञानमनुमितिः॥ यत्र यत्र धूमस्तत्र तत्राग्निरिति साहचर्यनियमो व्याप्तिः॥ व्याप्यस्य पर्वतादिवृत्तित्वं पक्षधर्मता॥ अनुमानं द्विविधं॥ स्वार्थं परार्थं च॥ स्वार्थं स्वानुमितिहेतुः॥ तथाहि॥ स्वयमेव भूयोदर्शनेन यत्र धूमस्तत्राग्निरिति महानसादौ व्याप्तिं गृहीत्वा पर्वतसमीपं गतः॥ तद्गते चाग्नौ संदिहानः॥ पर्वते धूमं पश्यन् व्याप्तिं स्मरति॥ यत्र धूमस्तत्राग्निरिति॥ तदनंतरं वह्निव्याप्यधूमवानयं पर्वत इति ज्ञानमुत्पद्यते॥ अयमेव लिंगपरामर्श इत्युच्यते॥ तस्मात्पर्वतो वह्निमानिति ज्ञानमनुमितिरुत्पद्यते॥ तदेतत्स्वार्थानुमानं॥ यत्तु स्वयमेव धूमादग्निमनुमीय परं प्रतिबोधयितुं पंचावयववाक्यं प्रयुज्यते॥ तत्परार्थानुमानं॥ यथा पर्वतोऽग्निमान् धूमवत्त्वात्॥ यो यो धूमवान्स सोऽग्निमान्॥ यथा महानसः॥ तथा चायं॥ तस्मात्तथेति॥ अनेन प्रतिपादितात् लिंगात्परोऽप्यग्निं प्रतिपद्यते॥ तदेतत्परार्थानुमानं॥ प्रतिज्ञाहेतूदाहरणोपनयनिगमनानि पंचावयवाः॥ पर्वतो वह्निमानिति प्रतिज्ञा॥ धूमवत्त्वादिति हेतुः॥ यो यो धूमवान्स सोऽग्निमान्॥ यथा महानस इत्युदाहरणं॥ तथा चायमित्युपनयः॥ तस्मात्तथेति निगमनं॥ स्वार्थानुमितिपरार्थानुमित्योः लिंगपरामर्श एव कार

Margin notes (left): न म॰; यितुं
Margin notes (right): व्याख्या॥ प्रमेयं २; न; ३

32

रणं॥ तस्माल्लिंगपरामर्शोऽनुमानमिति॥ लिंगं त्रिविधा॥ अन्वयव्यतिरेकि केवलान्वयि। केवलव्यतिरेकि॥
अन्वयेन व्यतिरेकेण च व्याप्तिमत् तदन्वयव्यतिरेकि॥ यथा वह्नौ साध्ये धूमवत्त्वं॥ यत्र धूमस्तत्राग्निरिति अन्व
यव्याप्तिः॥ यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाहृद इति व्यतिरेकव्याप्तिः॥ हेतुपुरःसरऽन्वयव्याप्तिः साध्याभाव
पुरस्सरा व्यतिरेकव्याप्तिः अन्वयमात्रव्याप्तिकं केवलान्वयिः॥ यथा घटोऽभिधेयः प्रमेयत्वात् पटवदिति॥ अत्र प्रमेयत्वा
ऽभिधेयत्वयोर्व्यतिरेकव्याप्तिर्नास्ति॥ सर्वस्य प्रमेयत्वादभिधेयत्वाच्च॥ व्यतिरेकमात्रव्याप्तिकं केवलव्यतिरेकि
॥ यथा पृथिवी इतरेभ्यो भिद्यते गंधवत्वात्॥ यदितरेभ्यो न भिद्यते न तद् गंधवत्॥ यथा जलं॥ न चेयं तथा॥ तस्मान्न त
चेति॥ अत्र यद्गंधवत्तदितरभिन्नमित्यन्वयदृष्टांतो नास्ति॥ पृथिवीमात्रस्य पक्षत्वात्॥ संदिग्धसाध्यवान् पक्षः॥ य
था धूमवत्त्वे हेतौ पर्वतः॥ निश्चितसाध्यवान् सपक्षः॥ यथा तत्रैव महानसः॥ निश्चितसाध्याभाववान् विपक्षः॥
यथा तत्रैव महाहृदः॥ सव्यभिचारविरुद्धसत्प्रतिपक्षासिद्धबाधिताः पंच हेत्वाभासाः॥ सव्यभिचारोऽनैकांतिकः॥ त्रि
विधः साधारणासाधारणाऽनुपसंहारिभेदात्॥ तत्र साध्याभाववद्वृत्तिः साधारणोऽनैकांतिकः॥ यथा पर्वतोऽग्निमा
न् प्रमेयत्वादिति प्रमेयत्वस्य वह्न्यभाववति हृदे विद्यमानत्वात्॥ सर्वसपक्षव्यावृत्तोऽसाधारणः॥ यथा शब्दो नित्यः
शब्दत्वात्॥ शब्दत्वं हि सर्वेभ्यो नित्येभ्यो व्यावृत्तं शब्दमात्रवृत्तिः॥ अन्वयव्यतिरेकदृष्टांतरहितोऽनुपसंहारी॥ यथा स
र्वमनित्यं प्रमेयत्वात्॥ अत्र सर्वस्यापि पक्षत्वात् दृष्टांतो नास्ति॥ साध्याभावव्याप्तो हेतुर्विरुद्धः॥ यथा शब्दो नित्यः का
र्यत्वात्॥ इति कार्यत्वे नित्यत्वाभावेनानित्यत्वेन व्याप्तेः॥ यस्य साध्याभावसाधकं हेत्वंतरं विद्यते स सत्प्रति

४

पक्षः॥ यथा शब्दो नित्यः॥ श्रावणत्वात् शब्दत्ववत्॥ शब्दो नित्यः कार्यत्वात्॥ इति घटवत्॥ असिद्धस्त्रिविधः॥ आश्र-
यासिद्धो व्याप्यत्वासिद्धश्चेति॥ तत्राश्रयासिद्धो यथा॥ गगनारविंदं सुरभि अरविंदत्वात् सरोजारविंदवत्॥ इति॥
अत्र गगनारविंदमाश्रयः स च नास्त्येव॥ स्वरूपासिद्धो यथा शब्दो गुणश्चाक्षुषत्वात्॥ अत्र चाक्षुषत्वं शब्दे ना-
स्त्येव॥ शब्दस्य श्रावणत्वात्॥ सोपाधिको व्याप्यत्वासिद्धः॥ साध्यव्यापकत्वे सति साधनाव्यापकत्वमुपाधिः॥ साध्य-
समानाधिकरणात्यंताभावाप्रतियोगित्वं साध्यव्यापकत्वं॥ साधनवन्निष्ठात्यंताभावप्रतियोगित्वं साधना-
व्यापकत्वं॥ यथा वह्निना धूमे साध्ये आर्द्रेंधनसंयोग उपाधिः॥ यथा पर्वतो धूमवान् वह्निमत्त्वात् इत्यत्रार्द्रे-
ंधनसंयोगोपाधिः॥ तथाहि यत्र धूमस्तत्रार्द्रेंधनसंयोग इति साध्यव्यापकत्वं यत्र वह्निस्तत्रार्द्रेंधनसंयो-
गो नास्ति॥ अयोगोलके आर्द्रेंधनाभावात् इति साधनाव्यापकत्वं॥ एवं साध्यव्यापकत्वे सति साधनाव्यापक-
त्वादार्द्रेंधनसंयोग उपाधिः॥ सोपाधिकत्वात् वह्निमत्त्वं व्याप्यत्वासिद्धं॥ यस्य साध्याभावः प्रमाणेन निश्चि-
तः स बाधितः॥ यथा वह्निरनुष्णः द्रव्यत्वादिति॥ अत्रानुष्णत्वं साध्यं [illegible] उष्णत्वं स्पा[illegible]त्यक्षेण निरू-
प्यते इति बाधितत्वं॥ व्याख्यातमनुमानं॥ उपमितिकरणमुपमानं॥ संज्ञासंज्ञिसंबंधज्ञानमुपमितिः॥ तत्क-
रणं सादृश्यज्ञानं॥ तथाहि कश्चिद्गवयशब्दार्थमजानन् कुतश्चिदारण्यकपुरुषात् गोसदृशो गवय इति
वाक्यं श्रुत्वा वनं गतो वाक्यार्थं स्मरन् गोसदृशं पिंडं पश्यति॥ तदनंतरमसौ गवयपदवाच्य इत्युपमितिरुत्प-
द्यते॥ आप्तवाक्यं शब्दः॥ [illegible]॥ आप्तस्तु यथार्थवक्ता वाक्यं पदसमूहः॥ यथा गामानयेत्यादि॥
शक्तं पदं॥ अस्मात्पदादयमर्थो बोद्धव्य इतीश्वरसंकेतः शक्तिः॥ आकांक्षायोग्यतासन्निधिश्च [illegible] वा

स्वरूपासिद्धो

॥श्रीमत्सद्गुरुनीलकंठचरणारविंदायनमः॥ ज्ञानंशास्त्रोत्थंविज्ञानंमनुभवः ॥रहस्यंभ
क्तिः॥सुगोप्यमपिवक्ष्यामीत्यादिनिर्दिशात्तत्स्यांगंसाधनं॥१॥ ननुत्वद्दर्शनेप्यस

॥श्रीभगवानुवाच॥ज्ञानंपरमगुह्यंमेयद्विज्ञानसमन्वितं॥सरहस्य
तदंगंचगृहाणगदितंमया॥१॥यावानहंयथाभावोयद्रूपगुणक
र्मकः॥तथैवतत्त्वविज्ञानमस्तुतेमदनुग्रहात्॥२॥ ॥राम॥ ॥

मर्थीऽहंकथंज्ञानाधिकारीस्यांतत्राह॥यावानिति॥यावान्स्वरूपंततः यथाभा
वः याहक्कुसत्त्ववान्।यानिरूपाणिगुणाः कर्माणिचयस्य॥२॥ ८ ॥

१

नाग०

एतदेव सम्यगुपदिशन् यावान्निसस्यार्थं स्फुटयति ॥ अहमेवाग्रे सृष्टेः पूर्वमासं स्थितः । नान्यत्किंचित् । यत् सत् स्थूलं असत् सूक्ष्मं परं तयोः कारणं प्रधानं । तस्याप्यंतर्मुखतया तदा मय्येव लीनत्वात् अहं च तदा आसमेव केवलेन चान्यदकरवं प-श्चात् सृष्टेरनंतरमप्यहमेवास्मि यदेतद्विश्वं तदप्यहमस्मि ॥ प्रलये चावशिष्येत

अहमेवासमेवाग्रे नान्यद्यत्सदसत्परं ॥ पश्चादहं यदेतच्च योवशि-ष्येत सोस्म्यहं ॥ ३ ॥ ऋतेर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि ॥ तद्विद्या-दात्मनो मायो यथाभासो यथा तमः ॥ ४ ॥ ॥ ॥ ॥

सोप्यहमेव अनेन चानाद्यनंतत्वादद्वितीयत्वाच्च परिपूर्णोहमित्युक्तं भवति ॥ ३ ॥ यथात्ममायायोगेनेत्सनेन मायाया अपिष्ठत्वाद्दृश्यमाणोपयोगित्वाच्च मायां निरूपयति ॥ ऋतेर्थं विनापि वास्तवमर्थं यद्यतः किमप्यनिरुक्तं आत्मन्यधिष्ठाने प्रतीयेत असदपि च न प्रतीयेत तत्र ॥ आत्मनो मम मायां विद्यात् । यथा आभासो द्वि

चंद्रादिरिति अर्थं विनाप्रतीतौ दृष्टांतः यथा तमःइतिसतो प्रतीतौ तमो राहुर्यथा ग्रहमंडले स्थितोपि न

36

यथाभावङ्सेततस्यष्ट्यति। यथामहाभूतानिभौतिकेषुअनुस्त्रष्टेरनंतरंप्रविष्टानितेषू
पलभ्यमानत्वात्। अप्रविष्टानिचप्रागेवकारणतयातेषुविद्यमानत्वात्। तथातेषु
भूतभौतिकेष्वहं। नचतेष्वहं। एवंभूतममसत्तेसर्यः॥५॥ साधनमाह आत्मनस्त

यथामहांतिभूतानिभूतेषूच्चावचेष्वनु॥ प्रविष्टान्यप्रविष्टानितथा
तेषुनतेष्वहं॥५॥ एतावदेवजिज्ञास्यंतत्वजिज्ञासुनात्मनः॥ अन्वय
व्यतिरेकाभ्यांयत्स्यात्सर्वत्रसर्वदा॥६॥

त्वजिज्ञासुना एतावत्त्वमेवजिज्ञा
स्यंविचार्यंतदेवाह। अन्वयःकार्येषुकारणत्वेनानुवृत्तिः। कारणावस्थायांतेभ्योव्यति
रेकः। तथाजाग्रदाद्यवस्थासुतत्तत्साक्षितयान्वयः॥ व्यतिरेकश्चसमाध्यादौ॥ एवम
न्वयव्यतिरेकाभ्यांयत्स्यात्सर्वत्रसर्वदाचतदेवात्मेति॥६॥ ॥श्रीराम॥ ॥छ॥

२
भाग०

यत्सार्पितं नेहमानः प्रजासर्गमितिलत्मसादीकरोति ॥ एतन्मतं सम्यगनुतिष्ठ समाधिना चित्तैकाग्र्येण कल्पेषु विकल्पाः विविधाः सृष्टयस्तेषु विमोहं कर्त्तृत्वाभिनि

एतन्मतं समातिष्ठ परमेण समाधिना ॥
भवान्कल्पविकल्पेषु न विमुह्यति क
र्हिचित् ॥ ७ ॥

वेशं न यास्यतीति ॥ ७ ॥ ॥ इति श्रीभागवते महापुराणे द्वितीय स्कंधे नवमो ध्याये चतुः श्लोकी भागवतं संपूर्णं ॥ ७ ॥ ॥ श्रीनारायणाय नमो नमः ॥

२
चतु०

१
भार०

॥श्रीगणेशायनमः॥ श्रीभगवानुवाच॥ महर्षिर्भगवान्व्यासः कृत्वेमांसंहितांपुरा॥ श्लोकैश्चतुर्भिर्धर्मात्मापुत्रमध्यापयेच्छुकं॥१॥ मातापितृसहस्राणिपुत्रदारशतानिच॥ संसारेष्वनुभूतानियातियास्यंतिचापरे॥२॥ हर्षस्थानसहस्राणिभयस्थानशतानिच॥ दिवसेदिवसेमूढमाविशंतिनचपंडितं॥३॥ ऊर्ध्वबाहुर्विरौम्येषनचकश्चिच्छृणोतिमे॥ धर्मादर्थश्चकामश्चसकिमर्थंनसेव्यते॥४॥ नजातुकामान्नभयान्नलोभात्धर्मंत्यजेज्जीवितस्यापिहेतोः॥ धर्मोनित्यःसुखदुःखेत्वनित्येजीवोनित्योहेतुरस्यात्वनित्यः॥५॥ इमांभारतसावित्रींप्रातरुत्थाययःपठेत्॥ सभारतफलंप्राप्यपरंब्रह्माधिगच्छति॥६॥ इतिश्रीचतुःश्लोकीभारतसंपूर्णमगमत्॥ ॥छ॥ ॥छ॥

१
चतु

३९

३त्रीघं

श्री ॥ ग्रंथादौ शांतिपठणं लिख्यंते ॥ वागीशाद्याः सुमनसः सर्वार्थानामुपक्र-
मे ॥ यन्नत्वा कृतकृत्याः स्युस्तन्नमामि गजाननं ॥१॥ यमिह करुणाकं शरणं
गतोप्यरिः सहोदरमाप महत्पदं ॥ नमत माशु हरिं परमाश्रयं जनकजाकम-
नं नसुखाकृतिं ॥२॥ श्रीगौर्याः सकलार्थदं निजपदं भोगेन मुक्तिप्रदं प्रोद्दं-
विघ्नवनं हरं तमनघं श्रीढुंढितुंडासिना ॥ वंदे चर्मकपालिकोपकरणैर्वैरा-
ग्यसौख्यात्परं नास्तीति प्रदिशंतमंतविधुरं श्रीकाशिकेशं शिवं ॥३॥ यत्क-
पालवमात्रेण मूको भवति पंडितः ॥ वेदशास्त्रशरीरां तां वाणीं वीणाकरां भजे ॥
४॥ कामाक्षी दत्तदुग्धप्रचुरसुरनुतप्राज्यभोज्याधिपूज्य श्रीगौरीनायकाभिख्य-
कटनशिवरामार्यलब्धात्मबोधैः ॥ श्रीमद्गोपालगीर्भिः प्रकटितपरमाद्वैतभा-
सास्मितास्य श्रीमद्गोविंदवाणीचरणकमलगो निर्वृतोऽहं यथालिः ॥५॥ श्रीशं-
करं भाष्यकृतं प्रणम्य व्यासं हरिं सूत्रकृतं च वच्मि ॥ श्रीभाष्यतीर्थे परहंससतुष्टे
वाग्जालबंधच्छिदमभ्युपायं ॥६॥ शंकरं शंकराचार्यं केशवं बादरायणं ॥ सूत्र

भाष्यकर्त्तॄन्वंदे भगवंतो पुनः पुनः ॥७॥ श्रीमच्छारीरकं भाष्यं प्राप्य वै कृतबुद्धिमाप्नु
यात् ॥ इति श्लोमेसफलोगंगार थ्योदकं यथा ॥८॥ नित्यं निजानंदसदद्वितीयं
शुद्धं विमुं सत्यमतिस्वतंत्रं ॥ सूक्ष्मं निरस्ताखिलद्वंद्वयमीशं प्रत्यंच मात्मानमजं
भजामि ॥९॥ यदज्ञान समुद्भूतमिंद्रजालमिदं जगत् ॥ सत्सज्ञानसुखानंतं तदहं
ब्रह्म निर्भयं ॥१०॥ ॐ नमो ब्रह्मादिभ्यो ब्रह्मविद्यासंप्रदायकर्तृभ्यो वंशऋ
षिभ्यो नमो गुरुभ्यः ॥ सर्वोपप्लवरहित प्रज्ञानघन प्रत्यगर्थो ब्रह्मैवाहमस्मि ॥
११ ॥ ओं अनुभानिनिराचेष्टतनोतिशुभसंततिं ॥ स्मृतिमात्रेण यत्सुसां ब्रह्म
तन्मंगलं विदुः ॥१२॥ ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा ॥ कंठं भित्वा
विनिर्यातौ तस्मान्मांगलिकावुभौ ॥ ॐ मथ ॐ मथ ॐ मथ ॐ ॥ गुरुर्ब्रह्मा
गुरुर्विष्णुर्गुरुर्देवो महेश्वरः ॥ गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥१३॥ ध ॥

॥श्रीगणेशायनमः॥अचक्षुष्ट्वान्नदृष्टिर्मेतथाश्रोत्रस्यकाश्रुतिः॥अवा
क्त्वान्नतुवक्तिःस्यादमनस्त्वान्मतिःकुतः॥१॥ॐ अप्राणस्यनकर्मास्ति
बुद्ध्यभावेनवेदिता॥विद्याविद्येततोनस्तश्चिन्मात्रज्योतिषोमम॥२॥
नित्यमुक्तस्यशुद्धस्यकूटस्थस्याविचालिनः॥अमृतस्याक्षरस्यैवमशा
रीरस्यसर्वदा॥३॥जिघत्सावापिपासावाशोकमोहौजरामृती॥नविद्यं
तेऽशरीरत्वाद्व्योमवद्व्यापिनोमम॥४॥अस्पर्शित्वान्नमेस्पृष्टिर्ना
जिह्वत्वाद्रसज्ञता॥नित्यविज्ञानरूपस्यज्ञानाज्ञानेनमेसदा॥५॥
यातुस्यान्मानसीवृत्तिश्चाक्षु[illegible]षारूपरंजिता॥नित्यमेवात्मनोदृ
ष्ट्यानित्ययादृश्यतेहिसा॥६॥तथान्येंद्रिययुक्तायावृत्तयोविषयांज
नाः॥स्मृतिरागादिरूपाचकेवलांतर्मनस्यपि॥७॥मानस्यःतद्वदन्य

३
प्र०च०

स्पष्टरूपं तेस्त्वभवत्त्वयः ॥ द्रष्टुर्दृष्टिस्ततो नित्या त्वनुबुद्ध्यानंता च केवला ॥ ८ ॥
अनित्यासा विनुद्धेति गत्यैतत्राविवेकतः ॥ सुखदुःखी तथा चाहं तद्रूप
योपाधिभूतया ॥ ९ ॥ मूर्छया मूर्छ इत्येवं बुद्ध्या बुद्ध इत्यपि ॥ मन्यते स
र्वलोकोप्ययेन संसारमृच्छति ॥ १० ॥ अचक्षुस्त्वाद्दिग्गास्त्रोक्तेः सबाह्याभ्यं
तरं त्यजेत् ॥ नित्यमुक्तं महात्मानं मुमुक्षुश्चैतत्सदा स्मरेत् ॥ ११ ॥ अचक्षुष्ट्वा
द्दृग्गास्त्राच्चनेंद्रियाणि सदा मम ॥ अप्राणो ह्यमनाः शुभ्र इति चाथर्वणे व
चः ॥ १२ ॥ शब्दादीनामभावश्च श्रूयते मम काठके ॥ अप्राणो ह्यमना यस्मा
दविकारी सदा ह्यहं ॥ १३ ॥ विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम ॥ वि
क्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः ॥ १४ ॥ अमनस्कस्य शुद्धस्य क
थं स्यात्तद्द्वयं मम ॥ अमनस्त्वाविकारि[illegible] त्वे विदेहव्यापिनो मम ॥ १५

३
स्तु०

इत्येतद्यावदज्ञानं तावत्कार्यं ममाभवत् ।। नित्यमुक्तस्य शुद्धस्य बुद्धस्य
च सदा मम ।। १६ ।। समाधिर्वा समाधिर्वा कार्यं वान्यत्कुतो भवेत् ।। मां हि ध्या
त्वा च बुध्वा च मन्यंते कृतकृत्यतां ।। १७ ।। अहं ब्रह्मास्मि सर्वोऽस्मि शुद्धो बु
द्धोऽस्म्यतः सदा ।। अजः सर्वत्र एवाहमजरश्चाक्षयोऽमृतः ।। १८ ।। मदन्यः
सर्वभूतेषु बोद्धा कश्चिन्न विद्यते कर्माध्यक्षश्च साक्षी च चेता नित्यो गु
णोऽद्वयः ।। न सत्त्वाहं न चासत्त्वं नो भयं केवलः शिवः ।। न मे ॰ संध्या न रात्रि
र्वा नाऽहर्वा सर्वदा दृशो ।। २० ।। सर्वमूर्तिविमुक्तोऽयं यथा खं सूक्ष्ममद्वयं ।।
तेनाप्यस्मि विना भूतं तत्र सैवाहं तथाद्वयं ।। २१ ।। ममा ॰ लास्वत आत्मे
ति भेदो व्योम्नो यथा भवेत् ।। एकस्य सुषिभेदेन तथा मम विकल्पतः ।। २२
भेदोऽभेदस्तथा चैको नाना चेति विकल्पितं ।। ज्ञेयं ज्ञाता गतिर्गंता मय्येक

२
ज्प्रच०

स्मिन्कुतोभवेत्॥२३॥नमेहेयंनचादेयमविकारीयतोस्म्यहं॥सदामुक्त
स्तथाशुद्धःसदाबुद्धोगुणोद्वयः॥२४॥इत्येवंसर्वदात्मानंविद्यात्सर्वंसमा
हित॥विदित्वामांस्वदेहस्थमृषिर्मुक्तोध्रुवोभवेत्॥२५॥कृतकृत्यश्चसि
द्धश्चयोगीब्राह्मणएवच॥यएवंवेदतत्त्वार्थमन्यथात्मात्महाभवेत्॥२६
वेदार्थोनिश्चितोशेषसमासेनमयोदितः॥सन्यासिभ्यःप्रवक्तव्यःशांते
भ्यःशिष्टबुद्धिना॥२७॥इतिचतुःसुत्रप्रकरणं॥आत्मज्ञस्यापियस्यस्या
ज्ज्ञानोपादानतायदि॥नमोक्षार्हःसविज्ञेयोवांताशीब्राह्मणोध्रुवं॥१॥वर्णा
श्रमाभिमानेनश्रुतेर्दासोभवेन्नरः॥वर्णाश्रमविहीनाश्चवर्तंतेश्रुतिमू
र्धनि॥१॥यावद्देहात्मविज्ञानंबाध्यतेनप्रमाणतः॥प्रामाण्यंकर्मशास्त्रा
णांतावदेवोपपद्यते॥२॥ ॥ ॥श्रीरामराम॥ गोपालहुह्न॥ ॥

२
वृ०

45

२५८

ग्री ॥ निर्विकल्पकसमाध्यभ्यासकाले लयविक्षेपकषायरसास्वा
दाख्येतिचतुर्विधप्रतिबंधकानिसंभवंति ॥ तत्र लयो द्विविधः ॥
निर्विकल्पकसमाध्यभ्यासपाटवेनाऽतिलघुलोहतल्पक्षिप्तनीर
बिंदुवत् तैलरहित दीपकलिकावच्च प्रत्यगभिन्नपरमानंदे चि
त्तवृत्तेर्लयः प्रथमः ॥ १ ॥ अथ द्वितीयस्तु ॥ मूर्छाऽवस्थावत् तूआ
लस्येन चित्तवृत्तेर्बाह्यशब्दादिविषयग्रहणाऽभावे सति प्रत्यग
त्मस्वरूपाऽनवभासनाद्वृत्तेस्तब्धीभावलक्षणो निद्रारूपः ॥ २ ॥
आद्यमंगीकृत्य द्वितीयस्य निषेधतो त्याह ॥ इति लयलक्षणं ॥
विक्षेपो नाम ॥ चित्तवृत्तेः स्थैर्याभावः ॥ २ ॥ कषायो नाम ॥ रागाद
यः ॥ ३ ॥ रसास्वादो नाम ॥ पूर्वानुभूतविषयरसास्वादनं ॥ ४ ॥

मायाऽनिर्वचनीयत्वलक्षणं ॥ अचिंत्यशक्तिमिति ॥ शक्तिशब्देन अत्र
मायाऽभिधीयते ॥ साच बोधात्मनो ब्रह्मणो भिन्नाऽभिन्नत्वादिरू
पेण चिंतितुं नार्हतीत्यचिंत्यत्वं मायायाः ॥ कथमिति चेत् उच्यते ॥ इयं
तु स्वप्रबोधबाध्यत्वात् स्वप्नसदृशी भवति ॥ युक्तिहीनप्रकाशत्वात् ॥
अस्याः मायेति संज्ञा ॥ इयमसती न भवति दृश्यमानत्वात् नहि शशि
विषाणादिकमसत् दृश्यते ॥ १ ॥ सती च न भवति ॥ बाध्यमानत्वात् ॥
नहि सन्नात्मा कदाचिद्बाध्यते ॥ २ ॥ आत्मनो न हि भिन्ना भवति ॥ अ
धिष्ठानसत्ताव्यतिरेकेण तस्याः पृथक् सत्ताया अभावात् ॥ नहि रज्वा
मारोपितस्य सर्पस्य तद्भिन्नत्वं रज्वाद्यभावे तदद्दर्शनात् ॥ ३ ॥ नैतद
भिन्ना च भवति ॥ जडत्वात् ॥ न हि जडाजडयोरेकस्वरूपत्वं ॥ वस्तुनो द्वै
रूप्याऽसंभवात् ॥ न चोभयात्मिका विरुद्धत्वात् ॥ ५ ॥ नेयं सावयवा अ

नादित्वेन स्वकारणाऽवयवाभावात् ॥ न ह्यकारणकं ब्रह्म सावयवं भव
ति ॥६॥ नापि निरवयवा स्वकार्येषु सावयवत्वदर्शनात् ॥ न ह्यंकुरादिका
॥७॥ रणकं निरवयवं भवतीति तस्मादविचारितरमणीया विलासिनी
तुल्या असत्सद्भूतेषु स्वकार्यविभ्रमे जीवं मोहयत्येव अतो माया
याः अचिंत्यत्वं इदं तु तस्याः दूषणाय न भवति किंतु भूषणमेव ॥छ
श्री ॥ ख्यातिनिरूपणं ॥ परत्र परावभासत्वाभ्यामध्यासमात्रलक्षणं व्याख्या
तमेव ॥१॥ आह कोऽयमध्यासो नाम ॥ उच्यते स्मृतिरूपः परत्र पूर्वदृष्टावभासः ॥
तं केचिदन्यत्राऽन्यधर्माध्यास इति वदंति ॥ केचित्तु यत्र यदध्यासस्तद्विवेकाऽग्र
हनिबंधनो भ्रम इति ॥ अन्ये तु यत्र यदध्यासस्तस्यैव विपरीतधर्मत्वकल्प
नामाचक्षत इति ॥ सर्वथापि त्वन्यस्याऽन्यधर्मावभासतां न व्यभिचरति ॥ त
था च लोकेऽनुभवः शुक्तिका हि रजतवदवभासते ॥२॥ परत्र परावभासलक्ष
णे संवादाः युक्तिभिः सत्याधिष्ठाने मिथ्यार्थावभाससिद्धेः सर्वतंत्रसिद्धांतः

देहत्व लक्षणमिति मत्वाऽन्यथात्मख्यातिवादिनो मतमाह ॥ तं केचिदिति ॥ केचिदन्य
थाख्यातिवादिनोऽन्यत्र शुक्त्यादावन्यधर्मस्य स्वावयवधर्मस्य देशांतरस्थरू
प्यादेरध्यास इति वदंति ॥ आत्मख्यातिवादिनस्तु बाह्यशुक्त्यादौ बुद्धिरूप
त्मनो धर्मस्य रजतस्याऽध्यास आंतरस्य रजतस्य बहिर्वदवभास इति वदंती
त्यर्थः ॥ अख्यातिमतमाह ॥ केचिदिति ॥ यत्र यस्याध्यासो लोके सिद्धस्तयो
रर्थयोस्तद्धियोश्च भेदाग्रहे सति तन्मूलो भ्रमः इदं रूप्यमिति विशिष्टव्यव
हार इति वदंतीत्यर्थः ॥ तैरपि विशिष्टव्यवहाराऽन्यथाऽनुपपत्त्या विशिष्टभ्रांतेः
स्वीकार्यत्वात् ॥ परत्र परावभाससंमतिरिति भावः ॥ शून्यमतमाह ॥ अन्यथे
त्विति ॥ तस्यैवाधिष्ठानस्य शुक्त्यादेर्विपरीतधर्मत्वकल्पनां विपरीतो विरुद्धो
धर्मो यस्य तद्भावः तस्य रजतादेरत्यंताऽसतः कल्पनामाचक्षत इत्यर्थः ॥ एते
षु मतेषु परत्र परावभासत्वलक्षणसंवादमाह ॥ सर्वथापीति ॥ अन्यथाख्या
तिव्यादिप्रकारविवादेऽप्यध्यासः परत्र परावभासत्वलक्षणं न जहातीत्यर्थः ॥
शुक्तावपरोक्षस्य रजतस्य देशांतरबुद्ध्योर्वा सत्त्वाऽयोगात् ॥ शून्यत्वे प्रत्यक्षता
ऽयोगात् ॥ शुक्तौ सत्त्वे बाधाऽयोगात् ॥ मिथ्यात्वमेवेति भावः ॥ आरोप्यमिथ्या

२

॥श्रीगणेशायनमः॥ श्वेतकेतुसुवर्चलासंवादंलिख्यते॥ सुवर्चलउवाच॥
पप्रच्छकोभवानत्रब्रूहिमेतद्द्विजोत्तम॥ तामाहभगवान्वाग्मीत्वयाज्ञातोन
संशयः॥१॥ द्विजोत्तमोहंसुभगेसत्यव्रतपरायणः॥ सात्तमाहमहात्मानं
पृच्छामित्वद्दिशायिने॥२॥ तच्छ्रुत्वाभसुवाचेनां सर्वज्ञोमुनिपुंगवः॥ मन
सैवसमायुक्तमात्मानंमन्यसेयदि॥३॥ तन्मिथ्यागोत्रसद्भावेवर्तितेदे
हबंधनः॥ त्वमप्यहमहंसर्वमहमित्येववर्तते॥४॥ नात्रतत्परमार्थेन
यन्मात्वमनुपृच्छसि॥ सदाऽहंकारशब्दोयंव्यक्तमात्मनिसंश्रितः॥५॥
नवाचस्तत्रवर्ततइतिमिथ्याभविष्यति॥ अहंशब्दोत्यहंभावेनात्मभा
वेत्रुभमभे॥ नवर्ततेपरोचिंत्येवाचःसगुणलक्षणा॥ सुवर्चलउ० अहं(
भावेन कोनामत्वात्मभावस्तथैवच॥ तन्मेब्रूहियथान्यायमेवंचेन्मु

50

२

निसत्तम॥८॥ श्वेतकेतुरु०॥ मृन्मयो हि घटा भासस्ताद्दृग्भाद्दृह्येष्यते। अहंभावः परो चिंसेत्यात्मभावो महान्परः॥९॥ नवाचस्तत्र वर्तते तद्दृ इतिने न विरुध्यते॥ सुवर्च्चलाउ०॥ निर्विकारं त्वमूर्तं च निरंशं सर्वगं तथा॥ दृ रूपते चाविपान्नित्यं ताद्दृगात्मा न दृश्यते॥१०॥ श्वेतकेतुरु०॥ त्वचास्प शतिवै वायुमाकाशास्य पुनः पुनः॥ तत्स्थं गंधं तथा घ्राति ज्योतिः पश्य ति चक्षुषा॥११॥ तमो रश्मिगणांचैव मेघजाले तथैव च॥ वर्षंताराग णं चैवना काशं दृश्यते पुनः॥१२॥ आकाशस्याप्यपाकाशं सद्रूपमिति नि श्चितं॥ सदर्थकल्पितं सर्वं तत्तत्संविष्णुरेव च॥१३॥ यानि नामानि गौण नि लुप्तचारात्परात्मने॥ न चक्षुषा न मनसा न चान्येन परो विभुः॥१४॥ चिं सेत सूक्ष्मया बुध्या वाचा वक्तुं न शक्यते॥ एतत्प्रपंचमखिलं तस्मिन्नेव प्रतिष्ठितं॥ ॥१५॥ ॥इति श्वेतकेतु सुवर्च्चलासंवादरूपब्रह्मलक्षणांसपूर्णं॥ ॥

१

१ ॐ

॥श्रीगणेशाय नमः॥ श्रीरामचंद्राय नमः॥ [illegible]कारः॥ केवलानंदो लक्ष्मा[illegible] त्रिगुणेश्वरः॥ शुद्धो नि
रंजनोऽनंतो बोधो ऽहं प्रकृतेः परः॥१॥ अर्धमात्रात्मको रामो सच्चिदानंदविग्रहः। पूर्णो नित्यः
शुद्धबुद्धो स्वरूपो नित्यचिन्मयः॥२॥ आनंदनंदनो रामो ब्रह्मानंदः सनातनः। चिन्म
यानंदरूपेण रामो तत्वनिरंजनः॥३॥ प्राणे रामः स्वयं ज्योतिर्मनानंदैकसर्वदा। आत्मा
रामः शिवोऽहं सो रामो तत्वं सदाशिवः॥४॥ परब्रह्मात्मको रामो विज्ञानघनलक्षणः।
रामोऽव्यक्तो परब्रह्मा सदोदितं॥५॥ आत्मा रामः परब्रह्म परं ज्योति परात्परं। ज्ञानेन ज्ञे
यमालोक्य आत्मारामं निर्विचयेत॥६॥ रामो सदाशिवस्तत्वं तत्वातीतो निरंजनं स्व
प्रकाशः स्वयं ज्योति विरजो [illegible]वं॥७॥ [illegible] राम रूपेण चिन्मात्रोऽहं सदाशिवः
आत्मारामः स्वयं ज्योति रामः सर्वहृदि स्थितं॥८॥ परब्रह्मात्मको रामो चतुर्वेदप्रवर्त
कः। शाश्वतो ब्रह्मात्मको रामः शाश्वतीतो निरंजनः॥९॥ आत्मारामः शिवोऽहं सोऽहं दिनित्य
प्रकाशते सच्चिदानंदरूपेण एवमात्मा सनातनं॥१०॥ सदाशिवात्मको रामः सच्चिदा
नंदविग्रहः तुर्यातीतो ब्रह्म सोऽहं ब्रह्मानंदैकनित्यशः॥११॥ रमते योगिनो नित्यं नंदे
चिदात्मनि इति रामपदेनासौ परब्रह्माधिगच्छति॥१२॥ इति श्रीतारकब्रह्मस्तोत्रं संपूर्णं॥

सत्या २

पूर्णब्रह्म ६

२ ७

८ [illegible]

१

॥श्रीरामतारककवच॥

॥स्तोत्र॥ ॥श्रीराम॥

[OrderDescription]
,CREATED=17.10.20 10:56
,TRANSFERRED=2020/10/17 at 11:02:19
,PAGES=53
,TYPE=STD
,NAME=S0004070
,Book Name=M-1412-SHABDRUPAWALI
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,